# श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय

(केन्द्रीय विश्वविद्यालय)

**बी-4, कुतुब सांस्थानिक क्षेत्र, नई दिल्ली-16**


## एकदिवसीयशोधकार्यशालाप्रतिवेदनम्

नवदेहलीस्थ-श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य शोधविभाग एवं दिल्लीसंस्कृतअकादमी इत्यनयोः संयुक्ततत्त्वावधाने 04.03.2024 तमे दिनाङ्के एकदिवसीया शोधकार्यशाला आयोजिता। भारतीयज्ञानपरम्परायां अनुसन्धानस्य विविधाः आयामाः सन्ति। अनुसन्धानेन साहित्यिकसामाजिकसमस्यानां समाधानं कर्तुं शक्यते। सामाजिक-व्यावहारिक-राजनैतिक-समस्यानां निराकरणाय संस्कृतशास्त्राणि रच्यन्ते स्म। आधुनिककाले अनुसन्धानपद्धतिः प्राचीनसंशोधनात् किञ्चित् भिन्ना अस्ति। प्राचीनकाले कस्यापि ग्रन्थस्याधारेण कृताः भाष्य-टीका-वृत्तिः इत्यादयः ऋषीणां सूक्ष्मानुसन्धानस्य परिणाम एव सन्ति। कार्यशालायां मुख्यातिथिरूपेण समागताः महात्मागाँधी-अन्ताराष्ट्रीयहिन्दीविश्वविद्यालयस्य पूर्वकुलपतयः प्रो.गिरीश्वरमिश्रवर्याः शोधच्छात्रान् निर्दिष्टवन्तः। विश्वविद्यालयस्य कुलपतयः प्रो. मुरलीमनोहरपाठकमहाभागाः अनुसन्धानपद्धतिं सरलरूपेणोपस्थापितवन्तः। शोधविभागस्य प्रमुखाः प्रो. शिवशङ्करमिश्रवर्याः शोधस्य ऐतिहासिकं स्वरूपं व्याख्याय भारतीयज्ञानपरम्परया सह शोधस्य पुरातनः सम्बन्धः अस्ति इति उक्तवान् । अनेकानि अनुसन्धानतथ्यानि वेदेषु प्राप्यन्ते। शोधप्रविध्या एव शोधकार्यं प्रभावोत्पादकं भवति । अस्यां कार्यशालायां श्रीलालबहादुरशास्त्रीराष्ट्रियविश्वविद्यालयस्य, जवाहरलालनेहरुविश्वविद्यालयस्य, दिल्लीविश्वविद्यालयस्य जामियामिल्लियाइस्लामियायाश्च 145 शोधच्छात्राः समुपस्थिता आसन्। तत्र शोधच्छात्राणां अनुसन्धानसम्बद्धप्रश्नानां समाधानं जातम्। अवसरेऽस्मिन् दिल्लीसंस्कृतअकादम्याः एवं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य आचार्याः, अधिकारिणः कर्मचारिणश्च समुपस्थिताः आसन् ।

(प्रो. शिवशङ्करमिश्रः)

शोधविभागाध्यक्षः

प्रो. शिवशंकर मिश्र
Prof. Shiv Shankar Mishra
शोधविभागाध्यक्ष
Head, Department of Research
श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय
Shri Lal Bahadur Shastri National Sanskrit University
बी–४, कुतुब सांस्थानिक क्षेत्र, नई दिल्ली-110016
B-4, Qutub Institutional Area, New Delhi-110016